# Shri Raghavendrasuprabhata Stotram

# श्रीराघवेन्द्रसुप्रभातस्तोत्रम्

## Document Information

Text title : Shri Raghavendrasuprabhata Stotram

File name : rAghavendrasuprabhAtastotram.itx

Category : deities_misc, suprabhAta, gurudev

Location : doc_deities_misc

Proofread by : PSA Easwaran

Latest update : April 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2021

*sanskritdocuments.org*

# श्रीराघवेन्द्रसुप्रभातस्तोत्रम्

श्रीमते राघवेन्द्राय सर्वाभीष्टप्रदायिने ।
मन्त्रालयनिवासाय गुरुराजाय मङ्गलम् ॥ १॥

सीतापते विधिकरार्चितकूर्मराज
भण्डारितो नृहरितीर्थमुनीन्द्रलब्ध
आनन्दतीर्थमुनिवंश्ययतीन्द्रपूज्य
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ २॥

श्रीरामदूतहनुमान् यदुनाथदूत
श्रीभीमसेनवररौप्यपुरावतार ।
श्रीव्यासहृत्प्रियतमामितशुद्धबुद्धे
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ३॥

ब्रह्माज्ञया दितिकुले बहुदोषपूर्णे
जातोऽपि भक्तिभरितो भुवनं समस्तम् ।
यो पीपवो दिविषदां वर शङ्कुकर्ण
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ४॥

दैत्येश्वरं हरिविरोधि हिरण्यकं तं
यो नीनयो हरिपदं पितरं स्वभक्त्या ।
प्रह्लादमृत्युहरिसम्भवकारणात्मन्
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ५॥

सोमान्वयोद्भव समस्तसुराजमौले
भूभारसंहरणतोषितकृष्णमूर्ते ।
बाह्लीकराज बहुराज सुधर्मधामन्
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ६॥

श्रीकृष्णदेवनृपतिस्सकलं स्वराज्यं

यस्मिन् स्वमप्यमलमर्पयदात्मभक्त्या ।
श्रीव्यासराज विदुषां वर दिव्यमूर्ते
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ७॥

श्रीमूलरामपदपङ्कजलोलभृङ्ग
श्रीपूर्णबोधमतरम्यसुधाब्धिचन्द्र ।
श्रीगौतमान्वयविभासकभव्यसूर्य
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ८॥

स्वीयान् समस्तनिगमान् प्रविलोक्य सूक्ष्मैः
सद्भाष्यसङ्ग्रहमिषे यदुवर्यवक्त्रे ।
श्रीजैमिनिर्यमभिपूजयतेऽतिमोदात्
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ९॥

स्पष्टार्थकैरनतिविस्तृतसूक्ष्मवाक्यैः
सूत्रार्थभाष्यमवेक्ष्य च तन्त्रदीपम् ।
व्यासो यशोभिरभिपूरयते दसायं(?)
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ १०॥

स्वस्वीयशास्त्रगतमर्थमतोऽधिकं च
दृष्ट्वा यतीन्द्रकृतिषु प्रणयातिनम्राम् ।
अर्चन्ति पाणिनिमुखा यमगाधबोधाः
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ११॥

रम्या सुधापरिमलोल्लसिता चकास्ते
सच्चन्द्रिकापि शुशुभे विलसत्प्रकाशा ।
टीकास्थलेषु रमितैः स्फुटभावदीपैः
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ १२॥

रम्यार्थरत्नपरिभूषितसर्वगात्र
सर्वाश्श्रुतीस्स्वशिरसा सहितेन्दिरा यम् ।
आरोप्य रक्षति सदा निगमान्तराज्ये
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ १४॥

श्रीवेङ्कटार्यवरतिम्मनगोपिकाम्बा-
दम्पत्यनुत्तमतपःफलवैणिकाग्र्यः ।
दारिद्र्यदुःखभयभञ्जनपुण्यमूर्ते

श्रीमूलराम भवतात्तव सुप्रभातम् ॥ १४॥

आनन्दतीर्थजयतीर्थकवीन्द्रतीर्था
श्रीरामचन्द्रविबुधेन्द्रजयेन्द्रतीर्थाम् ।
आशीश्शतं प्रददति स्पृहयन्ति यस्मै
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ १५॥

वादीन्द्रतीर्थसुमतीन्द्रमूखां स्तुवन्ति
कर्मादिनो गुणगणस्तवनैरुदारैः ।
त्वां पश्यता ननु गृहाण दयार्द्रदृष्ट्या
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ १६॥

गार्हस्थ्यमुत्तममयाचितलब्धवृत्त्या
कष्टो नयो निरनयो ह्यधुनाऽऽश्रितान् स्वान् ।
सर्वेष्टलाभपुरिपुष्टतमान्करोषि
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ १७॥

श्रीमत्सुधीन्द्रवरयोगिसरस्वतीभ्यां
संप्रेरितो यतिरभूर्बहुना श्रमेण ।
मन्त्रान् वहस्यनुदिनं स्वगतीन् पुनासि
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ १८॥

गङ्गादिपुण्यसरितः प्रणयातिबद्धाः
सद्रत्नहेमजलकुम्भशतैरिदानीम् ।
त्वां स्नापयन्ति विधिवत्त्यज योगनिद्रां
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ १९॥

मन्दारपुष्पदधिकुङ्कुममुख्यवस्तु
प्रत्यर्प्य मङ्गलकरं वनिता मुनीनाम् ।
नीराजनं विदधतेऽद्य सुरत्नदीपैः
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ २०॥

एते च कश्यपमुखा मुनयः श्रुतिस्थैः
आशीर्वचोभिरधुनाऽऽशिषमर्पयन्ति ।
लब्धाशिषं वरमथार्थिजनाय दद्याः
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ २१॥

एते नृपा धनचयं बहुवाहनस्था-
मानीय दर्शनकृते बहिरावसन्ति ।
तान्पावयाद्य कृपया निरपेक्षयोगिन्
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ २२॥

एषा समस्तजनता पररात्रकाले
शीतार्दितापि दधती वसनं जलार्द्रम् ।
त्वां सेवतेऽथ परिपूरय तत्तदिष्टं
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ २३॥

श्रीमूलराम जय दिग्विजयाख्य राम
वैकुण्ठवासमथ पूजयितुं समेहि ।
सर्वेऽप्यमी विधिकरा विहितात्मकृत्यां
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ २४॥

धन्या इमे तव गुणस्तवनैरसङ्ख्यैः
कण्ठोद्गतैर्दशदिशामशुभं हरन्ति ।
शृण्वन्ति देवसुजना नतकन्धरेण
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ २५॥

छात्त्रा इमे परिमलादिनिबन्धपाठ्य-
भागावलोकनकृतः पठनाय सज्जाम् ।
उत्तिष्ठ पाठय सुधामधुरारवेण
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ २६॥

शास्त्रेषु पूर्णधिषणा अपि पण्डितास्ते
द्वार्यासते स्वबहुसंशययापनाय ।
उत्तिष्ठ छिन्धि हृदयस्थितसंशयांस्तान्
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ २७॥

मन्त्रालये सुरुचिरे वरतुङ्गभद्रा-
तीरं गते सकलदैवतसन्निधाने ।
वृन्दावने निवसते गुरवेऽर्पितोऽहं
श्रीमूलराम भवतात्तव सुप्रभातम् ॥ २८॥

सन्तानसम्पदतिशुद्धविरक्तिभक्ति-
विज्ञानमुक्तिमुखसर्पफलप्रदातः ।

वाग्देहसौष्ठवकरातिपवित्रमूर्ते
    श्रीमूलराम भवतात्तव सुप्रभातम् ॥ २९॥

चिन्तामणिस्सुरतरुस्सुरधेनुपूर्वा
    भक्तेष्टदानकुशले त्वयि नम्रनम्राम् ।
स्वीये पदे समभिषिच्य समर्चयन्ति
    श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ३०॥

नानर्ति भक्तिभरपूरितदासगोष्ठी
    विस्मृत्य देहमुत लोकमिमं स्मरन्ती ।
त्वां स्मारयन्त्यतुलनारदगानगोष्ठीं
    श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ३१॥

खञ्जोऽपि रावति जडः कवितां विधत्ते
    मूकोऽपि वक्ति बहु पश्यति सर्वमन्धः ।
एडश्शृणोति कृपया तव पश्य लीलां
    श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ३२॥

वृन्दावनेषु जगतीतलमध्यगेषु
    सर्वेषु सन्निहितया बहुरम्यमूर्त्या ।
सर्वेष्टमाकलय सन्त्यज भूमिशय्यां
    श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ३३॥

श्रीकृष्णभक्तिमतुलामवलम्बमाने
    सर्वास्ति शक्तिरिति डिण्डिमघोषपूर्वम् ।
यो बूबुधः(?) स्वमहिमातिशयप्रकाशैः
    श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ३४॥

तं त्वत्समं विदधतो भवतः प्रभावं
    दृष्ट्वा जहाति जनता खलु नास्तिकत्वम् ।
आस्तिक्यवर्धन जगद्गुरुवर्य भूम्ना
    श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ३५॥

ऐरावतप्रमुखदैवतवाहनानि
    सिद्धानि सर्वविबुधैरभियापितानि ।
तेषु स्थितो महिगतो दिश भक्तकामान्
    श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ३६॥

एत्येति भक्तिभरितास्सुजयेन्द्रतीर्था
    वृन्दावनोद्भवसमात्रिशते महेऽस्मिन् ।
अञ्चन्ति हेमकवचेन गुरो समेहि
    श्रीमूलराम भवतात्तव सुप्रभातम् ॥ ३७॥

श्रीराघवेन्द्र भवतात्तव सुप्रभातं
    त्वत्सुप्रभातपठनस्य सुखं प्रभातम् ।
भूयात्त्वदीयकृपया मम सुप्रभातं
    त्वत्सुप्रभातकवनस्य च सुप्रभातम् ॥ ३८॥

येनोद्धृतः पापकूपाल्लक्ष्मीनारायणाभिधः ।
अञ्चाम्यहमुपाध्यायस्सुप्रभातेन तं गुरुम् ॥ ३९॥

इति श्रीराघवेन्द्रसुप्रभातं समाप्तम् ।

At times, the refrain shrImUlarAma is changed to shrIrAghavendra.

Proofread by PSA Easwaran

*Shri Raghavendrasuprabhata Stotram*

pdf was typeset on December 23, 2021

Please send corrections to *sanskrit@cheerful.com*